भवतीति"। अत्र पापगौरवमाकलय्य संयतेन मासैकं यावत् जलमवगाह्याघमर्षणसूक्तं त्रिरावर्त्य स्नातव्यम्। तथा च लघुयमः "महापातककर्त्तारश्चत्वारश्च विशेषतः। अग्निं प्रविश्य शुध्यन्ति स्नात्वा वाघ इति क्रतौ। रहस्यकरणे चैव मासमभ्यस्य पौरुषम्। अघमर्षणञ्च वा सूक्तं शुध्येच्चान्तर्जलेस्थितः"इति। वृहद्यमः "अथ ब्रह्महत्यां कृत्वा प्राचीं वा उदीचीं वा दिशमुपनिष्क्रम्य प्रभूतेनेन्धनेनाग्निं प्रज्वाल्याघमर्षणं चाष्टसहस्रमावर्त्य जुहुयात् तस्मात् पापात् पूतो भवतीति"। हारीतश्च "अन्तर्ज्जले त्रिरावर्त्य मुच्यते ब्रह्महत्ययेति"। वृद्धापस्तम्बः "अकार्य्यकरणे चैव अभक्ष्यस्य च भक्षणे। अघमर्षणसूक्तेन पीत्वापः शुध्यते नरः"। वशिष्ठः "मनसा पापं कृत्वा अघमर्षणं जपेत्" इति। वृद्धापस्तम्बः "क्षत्रियागमने वैश्यागमने चैव तापसीम्। त्रिरावर्त्य विशुद्धः स्यात् शूद्रागाम्यघमर्षणम्" इति। तापसीमिति तापसीम् ऋचमित्यर्थः शङ्खलिखितौ "ब्रह्महा "त्रिरात्रोपोषितोऽन्तर्जलेऽघमर्षणं त्रिरावर्त्तयेत्" इति। याज्ञवल्क्यः त्रिरात्रोपोषितोजप्त्वा ब्रह्महा त्वघमर्षणम्। अन्तर्जले विशुद्धेत्तु दत्त्वा गान्तु पयस्विनीम्" इति। प्रकाशविषये बौधायनः "तीर्थं गत्वा ततः शुचिरात्मा उदकान्ते स्थण्डिले उद्धृत्य सकृच्छिन्नवाससा सकृत् पूर्णेन पाणिना आदित्याभिमुखः अघमर्षणमध्यायमधीयीत इति"।

षडङ्गन्यासं कृत्वा वामहस्ते जलं निधाय दक्षिणहस्तेन जलमाच्छाद्य हं यं रं लं वं इति त्रिरभिमन्त्र्य मूलमुच्चरन् गलितोदकविन्दुभिस्तत्वमुद्रया सप्तधा मूर्द्धानमभ्युक्ष्य शेषजलं दक्षिणहस्ते समादाय तोजोरूपं ध्यात्वा इडयाकृष्य देहान्तःपापं प्रक्षाल्य कृष्णवर्णं तज्जलं ध्यात्वा पिङ्गलया विरेच्य पुरः कल्पितवज्रशिलायां फडिति मन्त्रेण पापपुरुषस्वरूपं तज्जलं निःक्षिपेदित्यघमर्षणम् इति तन्त्रसारे तान्त्रिकाघमर्षणमुक्तम् तत्प्रमाणं तु तत्रैवावगम्यम्।

**अघमार** त्रि० अघं मारयति मृ-णिच्-अण् उप०। पापनाशके देवादौ, "यमोमृत्युरघमारो निर्ऋत" इति वेदः।

**अघरुद्** त्रि० अघं रोदिति स्वकर्म्माक्षमतया यस्मात् रुद-अपादाने क्विप् ६त०। पापापनोदनहेतौ, पापनाशने मन्त्रे। "मा त्वाघरुदोरुदन्" इति वेदः। अघे व्यसने रोदिति न तु तत्प्रतीकाराय घटते रुद+कर्त्तरि क्विप्। रोदनेनैव व्यसनोत्तारके तत्प्रतीकारार्थमनुद्यते त्रि०।

**अघर्म्म** पु० न०त०। उष्मविरोधिशीते तद्वति त्रि०। "अघर्म्मकाल" इति काद०।

**अघल** त्रि० अघं लाति म्लाति नाशयतीति ला-क। पापापनोदके। "ऋत्योर्यै अघलादूता" इति वेदः।

**अघवत्** त्रि० अघमस्त्यस्य मतुप् मस्य वः। पापवति सम्बोधने अघोः-अघवन्। "अघोयजेति" मुग्धबोधम्।

**अघविष** पु० अघं व्यसनकारि-विषं यस्य। सर्पे।

**अघशंस** पु० अघमनिष्टं शंसति इच्छति शंस-अण् उपस०। अनिष्टसंपादके चौरे "अपाघशंसंनुदतामरातिमिति" वेदः। भावे अच् ६त०। व्यसनसूचने पु०।

**अघशंसिन्** त्रि० अघं शंसति सूचयति शंस-णिनि ६त०। व्यसनसूचके "व्यसनाशंसाकर्त्तरि "वचः क्रूरं मयोक्तमघशंसिनेति। स्त्रियां ङीप्।

**अघायु** त्रि० अघं पापं परव्यसनं वा कर्त्तुमिच्छति अघ+क्यच्-उ। पापाचरणेच्छावति, परव्यसनचिकीर्षके च। "त्वा वृका अघायवोविदन्" इति यजु०। परस्याघं कर्त्तुमिच्छन्तीति वेददीपः। अघमायाति आ+या उ ६त०। हिंसानिरते। "बधोऽघायूनामिति" ता०ब्रा०।

**अघायुस्** त्रि० अघं पापसाधनमायुरस्य। सर्व्वावस्थासु पापकारके "अघायुरिन्द्रियारामोमोघं पार्थेति" गीता।

**अघारिन्** त्रि० अघं व्यसनमृच्छति ऋ-णिनि। व्यसनयुक्ते स्त्रियां ङीप्। "अघारिणीविकेश्योरुदत्य" इति वेदः।

**अघासुर** पु० कर्म्म०। असुरभेदे अघनाशनशब्दे तत्कथा।

**अघाह** पु० अघस्य व्यसनस्याहः अचसमा०। व्यसनदिने अशौचदिने "अघाहं नैव वर्द्धयेदिति" "अघाहेषु निवृत्तेषु सुस्नाताः कृतमङ्गलाः। आशौचाद्विप्रमुच्यन्त इति" च स्मृतिः।

**अघोर** त्रि० न घोरः भयानकः। भयानकभिन्ने सौम्यरूपे "या ते रुद्र!"शिवा तनूरघोरा पापकाशिनी"इति वेदः। "अघोरा सौम्या अत एव पापकाशिनी शिवा च इति" वेददीपः। नास्ति घोरो यस्मात्। अतिभयानके त्रि०। रुद्रमूर्त्तिभेदे पु०। "ईशानाघोरनामानौ, वामदेवस्ततःपरम्। सद्योजात इति प्रोक्ताः क्रमशोऽर्च्चनकर्म्मणीति पुरा०। अघोरः शिव उपास्यत्वेनास्त्यस्याम् अघोर+अच्। भाद्रकृष्णचतुर्दश्यां स्त्री। "भाद्रे मासि सिते पक्षे ह्यघोराख्या चतुर्दशी। तस्यामाराधितः स्थाणुर्नयेच्छिवपुरं ध्रुवमिति" पुरा०।

**अघोष** पु० नास्ति घोषोऽस्मात् वा। वर्णोत्पादनार्थे वाह्य